# वैदिकवाङ्मये चन्द्रस्योत्पत्तिः स्वरूपं च

*– डॉ. नन्दनकुमारतिवारी*

(वैदिक वाङ्मय में चन्द्रमा को सुधाकर, चन्द्र, कुमुदप्रिय, रजनीपति, शुभ्रभानु, रोहिणीपति, कलानिधि, उडुपति तथा शीतकर नाम से सम्बोधित किया गया है। चन्द्रमा की उत्पत्ति और उसके स्वरूप के बारे में संस्कृत वाङ्मय में कई उद्धरण प्राप्त होते हैं। वस्तुतः चन्द्रमा की उत्पत्ति कैसे हुई है? उसका स्वरूप कैसा है? वैदिक वाङ्मय में वर्णित चन्द्रमा की उत्पत्ति एवं स्वरूप के बारे में यदि देखा जाय तो वेद-पुराणों में तत्सम्बन्धित अलग-अलग मत-मतान्तर प्राप्त होते हैं। ऋग्वेदसंहिता के अनुसार एक ही कालखण्ड में सूर्य-चन्द्र की उत्पत्ति ब्रह्मा जी के नेत्रों तथा मन से हुआ है। ऐतरेयब्राह्मण के अनुसार सूर्य से चन्द्रमा की उत्पत्ति हुई है। पुराणों के अनुसार भी चन्द्रमा की उत्पत्ति सूर्य के कारण ही बतलायी गयी है। निरूक्तकार यास्क के मत में चन्द्रमा को लोक का रक्षक, कान्तिप्रदाता तथा देवस्वरूप कहा गया है। ज्योतिषशास्त्र के प्रसिद्ध ग्रन्थ सिद्धान्तशिरोमणि के अनुसार चन्द्रमा की उत्पति के बारे में आचार्य भास्कर का कथन है कि– हरिहर भगवान् से ब्रह्मा ने वर प्राप्त करके सहर्ष पुत्र की कामना की तो उनके त्रिनेत्र से पिघले हुए जल बिन्दुओं को एकत्रित करके पितामह ने आकाश में निवेशित कर दिया। इस प्रकार चन्द्रमा को जलमय कहा गया है। चन्द्रमा की श्यामलता निजमूर्ति की छाया के रूप में है। ऐसा हम स्मृति-पुराणों में भी सुनते हैं। 'विधूर्ध्वभागे पितरो वसन्तः' के अनुसार चन्द्रमा के पृष्ठ भाग पर 'पितरों का लोक' स्थित है। ज्योतिषशास्त्र में चन्द्रमा सर्वाधिक तीव्रगति वाला ग्रह कहा गया है। चन्द्रमा वृष राशि में उच्च का तथा वृश्चिक राशि में नीच का होता है। चन्द्रमा की दशा 10 वर्षों की होती है। इसके अधिदेवता उमा तथा प्रत्यधिदेवता 'जल' है। आधुनिक मतानुसार चन्द्रमा को पृथ्वी का उपग्रह बताया जाता है।)

सुविदितमेव वैदिकवाङ्मयस्य क्षेत्रम् अत्यन्तं विस्तृतमेव। तत्र चन्द्रस्योत्पत्तिः कथं, स्वरूपं च कीदृशं? प्रश्नोऽयं विचार्यते–वस्तुतः चन्द्रस्योत्पत्तिविषये वेदपुराणादिषु मतान्तरमुपलभ्यते। ऋग्वेदसंहितानुसारेण एककालावच्छेदेनैव सूर्यचन्द्रमसोरुत्पत्तिः क्रमशः ब्रह्मणो नेत्राभ्यां मनसश्चाभवत्। ऐतरेयब्राह्मणम् 'आदित्याद्वै चन्द्रमा जायते' इत्युक्त्वा सूर्यसकाशादेव चन्द्रोत्पत्तिं स्वीकरोति। कतिचन पुराणान्यपि 'ऋक्षचन्द्रग्रहाः सर्वे विज्ञेयाः सूर्यसम्भवाः।' 'शीतरश्मिः समुत्पन्नः कृत्तिकासु निशाकरः' इत्यादिना एतदेव प्रमाणयन्ति। सिद्धान्तशिरोमणौ श्रृंगोन्नत्यधिकारस्य 8-9 श्लोकयोरुपपत्तौ भास्करेण "अत्र हरिहरविरंचिवरलाभश्रवणसहर्षपुत्रकामात्रिनेत्रविगलितजलबिन्दु-रयमिन्दुः पितामहेन ग्रहत्वेनाकाशे निवेशित इति श्रूयते स्मृतिषु पुराणेषु" इति चन्द्रोत्पत्तिकारणं लिखितमस्ति। परन्त्वाधुनिकी धारणा भिन्नास्ति आधुनिकमतेन

पुराकाले चन्द्रः पृथिव्या एकमङ्गमेवासीत्। अयं चन्द्रोऽस्माकं पृथिव्या एकमात्रं उपग्रहोऽस्ति। यस्य कक्षीयाक्षीयभ्रमणं च तुल्यकालेन भवति।

अनन्तेऽस्मिन् नीलाकाशनिलये समाकीर्णानां दीप्तिजुषां नक्षत्रपुञ्जानामधीशः, विभावर्या विभूषणं, कौमुदीनामाकरः, अनुपमसुषमासमन्वितः, अशेषजन्तुलता-वीरुधाञ्च पालकश्चन्द्रः न केवलमाबालवृद्धानां जनानामेवाकर्षणहेतुः, अपि तु पशुपक्षिणामपि चेतसि तथैव प्रमोदमुत्पादयति। चकोरश्चन्द्रपिण्डभ्रान्त्या ज्वलदङ्गारमत्ति इति लोकप्रसिद्धिरस्ति। अस्य चन्द्रं प्रति अनिमिषमवलोकनं काव्येष्वपि दृश्यते[1]। यथा–

**चकोर्य एवं चतुराश्चन्द्रिकाचामकर्मणि[2]।**

'चदि' धातोः सकाशाच्चन्द्रशब्दः सिध्यति। 'चदि' धातोः सकाशाच्चन्दनमपि सिध्यति। यथा चन्दनं कस्यचिन् मस्तके शोभां पुष्णाति तथैव चन्द्रोप्याकाशे बिन्दुरूपेण शोभां धत्ते। अस्य गतिः शोभना वर्तते। अर्थाद् गच्छन्नाकाशे चन्द्रोऽतीव शोभां प्राप्नोति। अयं चिरकालं यावद् भ्रमति। चन्द्रोऽयं कृष्णपक्षे सूर्येणाऽऽपीतो भवति। पश्चात् शुक्लपक्षे तस्य सूर्यकिरणेनैव पूर्तिरपि भवति।

यास्कवचनेन चन्द्रमसि देवत्वं ग्रहत्वं चापि सिध्यति। यथा– चन्द्रो लोकस्य रक्षकः, जनानां जननी, कान्तिप्रदाता इत्येते गुणधर्मास्तस्मिन् देवत्वं साधयन्ति। अस्य कान्तिकर्मसम्पादनं, कालनिर्धारणम् (वर्षमासर्तुप्रभृतीनाम्), आकाशे भ्रमणादीनि कर्माण्यस्य ग्रहत्वं साधयन्ति। तथा चास्याऽऽह्लादकत्वं चन्दनबिन्दुसदृशं वर्तुलत्वं चास्य गुणस्वरूपे प्रकटयतः। एवं चन्द्रः स्वरूपद्वयेन (पार्थिवपिण्डरूपेण देवस्वरूपेण च) अस्माकं सम्मुखं समायाति। यत्र चन्द्रो देवत्वेन स्वीकृतस्तत्र तस्य पूजनविधिरपि प्रदत्तो वर्तते। अस्य स्थाने स्थाने मानवीयविग्रहोऽपि दृश्यते।

**चन्द्रोत्पत्तिः–**

सृष्ट्यारम्भकाले यदा केवलं शून्यमेवासीत् तदा केन प्रकारेण केन क्रमेण च सृष्टिरचना जाता इति निम्नमन्त्रेषु वर्णितम्–

**"ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः। समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी। सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् दिवञ्च पृथ्वीञ्चान्तरिक्षमथो स्वः[3]।"**

एषु सूर्यचन्द्रयोः सृष्टिः एककालावच्छेदेन ब्रह्मणा तथैव कृता यथा पूर्वकल्पे कृता आसीत्। चन्द्रे प्रकाशकत्वं ब्रह्मणः सर्वभूतगतमनसः सकाशाज्जातम्। अत एवोक्तम्– **"चन्द्रमा मनसो जातः"[4]**। अस्य वैदिकतत्वस्य सम्यग् व्याख्या

महाभारते वर्तते। नरनारायणौ नारदं प्रत्यूचतु: यत्तस्माद्देवात् सर्वभूतगतं मन: उद्गच्छति। येन युक्तो भूत्वा चन्द्रः प्रकाशकत्वं गुणं धारयति[5]। इयमेव व्याख्या अन्यत्राप्युपलभ्यते, यथा– **"अथ यन्मन आसीत् स चन्द्रमा अभवत्[6]।"**

शतपथब्राह्मणे चन्द्रोत्पत्तिः वृत्राज्जाता इति निर्दिष्टम्। यथा– इन्द्रस्तं (वृत्रं) द्वेधा अन्वभिनत्तस्य सौम्यं न्यक्तभास तं चन्द्रमसं चकार। अथ यदस्यासुर्यमास तेनेमाः प्रजा उदरेणाविध्यत्[7]।

अस्य सामान्योऽर्थस्तु समीचीनः न प्रतिभाति, अतोऽस्य विशिष्टार्थो-ऽन्वेष्टव्य:। यथा– वृत्रशब्दो मेघार्थे प्रयुज्यते। आकाशे मेघस्थानादुपरि मेघसदृशः एकः पदार्थो यो 'नीहारिका' पदेन व्यवह्रियते। सूर्यादीनां ग्रहाणामुत्पत्तिः तस्मादेव नीहारिकाख्यपदार्थाज्जाता इत्याधुनिकानां वैज्ञानिकानां मतम्। अत्रापि वृत्रशब्दो नीहारिकापदवाच्यः। इन्द्रेण छिन्नस्य वृत्रस्य यः उत्तमांशः सौम्यांश भाग आसीत् तं चन्द्रमसं चकार, अत्रायमभिप्राय: प्रतिभाति।

शतपथब्राह्मणे एव यज्ञचयनप्रसङ्गे चन्द्रोत्पत्तिविषये माध्यन्दिनमुनिः वक्ति– "सोऽकामयत। भूय एव स्यात्। प्रजायेतिति स आदित्येन दिवं मिथुनं समभवत्। तद् आण्डं समवर्तत। तद् अभ्यमृशत् रेतो बिभृहीति। ततश्चन्द्रमा असृज्यत। एष वै रेतः। अथ यदश्रु संक्षरितमासीत्, तानि नक्षत्राण्यभवन्। अथ य: कपाले रसो लिप्त आसीत् ता अवान्तरदिशोऽभवन्। अथ यत् कपालमासीत् ता दिशोऽभवन् इति।"[8]

अस्यां ऋचायां चन्द्रोत्पत्तिरण्डाज्जाता इति वर्णितम्। अत्र प्रथमं दिवसूर्ययोः परस्परं मिथुनं सञ्जातमितिनिर्देशो वर्तते। अस्याभिप्रायोऽपि विज्ञानेन साम्यमुपैति। अनेनान्तरिक्षे सूर्यमण्डले वा काचिद् आप्लावा समागता आसीद् या मिथुनशब्देन निर्दिष्टा ऋषिणा इत्यनुमीयते। इदमपि सम्भाव्यते यत् सूर्यः भ्रमन्नाकाशे कांचिन्नीहारिकामन्यपिण्डं वा आकृष्टवान्, पश्चादुभयोः परस्पराकर्षणविकर्षणा-भ्यामण्डाकारिता जाता, ततः पिण्डो भग्नो भूत्वा भूचन्द्रादिविविधानाम् अनेकेषां लघुपिण्डानां स्वरूपे परिवर्तितो जात:। अद्यापि ते पिण्डाः स्वीयकक्षोत्पत्तौ कारणभूतं सूर्यं परितः भ्रमन्ति। अमुमेवाभिप्रायं सम्प्रधार्य। महर्षिकृष्णद्वैपायनेन मत्स्यपुराणे लिखितम्–

**नक्षत्रग्रहसोमानां प्रतिष्ठा योनिरेव च।**
**चन्द्रऋक्षग्रहा: सर्वे विज्ञेया: सूर्यसंभवा: ।। (127/29)**

पुराणेषु चन्द्रोत्पत्तिविषये बह्व्यः कथाः समुल्लिखिताः सन्ति। यथा– समुद्रमन्थनाच्चन्द्रोत्पत्तिः, कृत्तिकाभिश्चन्द्रोत्पत्तिः, अत्रेर्नेत्राभ्यां चन्द्रोत्पत्तिः, अनुसूयायाः गर्भेण च चन्द्रोत्पत्तिः। तेषु समुद्रमन्थनाच्चन्द्रोत्पत्तिरेवम्[9]।

यदा सुरासुरौ समुद्रमन्थनमकुरुतां तदा तस्मान्महासागराच्चतुर्दश रत्नानि नि:सृतानि–

**लक्ष्मीकौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमाः ।**
**गाव: कामदुघा: सुरेश्वरगजो रम्भादिदेवांगनाः ।।**
**अश्व: सप्तमुखो विषं हरधनु: शंखोऽमृतं चाम्बुधेः ।**
**रत्नानीह चतुर्दश प्रतिदिनं कुर्वन्तु वो मंगलम् ।।**

तेष्वेकःशतसूर्यसमो दीप्तिमान् प्रशस्तकान्तिसम्पन्नः शीतरश्मिसंवलित-श्चन्द्रोऽप्यासीत्।[10] अत्र वैदिकविज्ञानेनायं संकेतो प्राप्यते यदिदमाख्यानमतीव वैज्ञानिकम्, यतोऽन्तरिक्षमपि समुद्रपदेन व्यवहृतं दृश्यते वेदेषु। तत्र पर्वता अपि दृश्यन्ते इति श्रुति:। तयोः पर्वतसमुद्रयोः परस्परं संघर्षणेन चन्द्रोत्पत्तिर्जाता।

अस्मिन् विषयेऽन्याप्येका युक्तिः विज्ञानसम्मता वर्तते। यत् समुद्राः पर्वताश्च पृथिव्युपरि वर्तन्तेऽतः समुद्रमन्थनमपि पृथिव्यामेव संजातम्। एवं भूमे: सकाशादेव चन्द्रोत्पत्तिरपि जाता। यस्मात् स्थानाच्चन्द्रो विनिर्गतस्तस्मिन् स्थाने महान् गर्त: प्रादुरभवत्। स एवाद्य प्रशान्तमहासागरनाम्ना प्रथितः पृथिव्याम्। अत्र समुद्रमंथनेन कस्यचिद् विप्लवस्याभिप्रायो ग्रहीतव्य:। आधुनिकैरपि मतमिदं समर्थितम्। अन्यच्च ब्रह्माण्डपुराणे चन्द्रोत्पत्तिविषये लिखितं वर्तते, यत्–

**त्विषिमान् धर्मपुत्रस्तु सोमो देवो वसोस्सुत: ।**
**शीतरश्मि: समुत्पन्न: कृत्तिकासु निशाकर: ।।**

ब्रह्माण्डपुराणम्–(2/24/130)

अत्र कृत्तिकानक्षत्रपुञ्जाच्चन्द्रोत्पत्तिर्निर्दिष्टा। पुराणपक्षे कथाप्रसंगेऽस्य जन्म षट्सु कृत्तिकासु भवितुमर्हति इति। एवमेव स्कन्दपुराणे अनुसूयायां चन्द्रोत्पत्तिर्वर्णिता। परमस्य वास्तविकाभिप्रायोऽद्यावधि न स्पष्टतां गत:। अन्यच्च वेदेषु पुराणेषु च अत्रिनेत्राभ्यां समुद्भूतस्य चन्द्रस्य वर्णनं दरीदृश्यते सर्वत्र। तत्कथमिति प्रदर्श्यते–

“यदोर्ध्वरेता अत्रिनामा महर्षि: पुत्रकाम्यया तपस्यायां संलग्न आसीत् तदा तस्योपरि प्रीता भूत्वा ब्रह्मविष्णुशंकराश्च त्रयो देवास्तस्मै वरं दत्तवन्तः यच्चन्द्रं पुत्ररूपेण लभस्व। एवमाशीर्वचनं श्रुत्वैव अत्रेर्नेत्राभ्यां सोमसंज्ञकं वारि सुस्राव, येनाखिलं भूमण्डलं प्रकाशितं जातम्, ब्रह्मा आदिष्टा दश दिशः स्वगर्भेषु तमधारयन्। परमन्ततो दिशोऽपि तत्तेजो धारयितुमक्षमा जाताः। अतस्ताभि: सोमः भूमौ प्रक्षिप्तः। तदा भूमौ पतितं सोमं दृष्टवा ब्रह्मा तं रथे संस्थाप्याऽऽकाशं नीतवान्। स एव सोमश्चन्द्रो जात:”[11]

उक्तकथायामत्रिनेत्रजश्चन्द्र इत्युक्तम्। अयं साहित्यिकप्रयोगः न तु सामान्य-व्यवहारोपयोगिभाषायाः, अतोऽस्य तात्पर्यार्थ एव ज्ञातव्यः। शरीरे सर्वाङ्गापेक्षया प्रियतममङ्गं चक्षुरस्ति। अत: सर्वप्रियवस्तूनामुपमा नेत्राभ्यां दीयते। अत्रापि सैव स्थितिरस्ति। चन्द्रः अत्रेः कृते पुत्र इव प्रिय आसीत्। अद्यापि पुत्रश्चक्षुषा उपमीयते। यथा हिन्दीभाषायां गोस्वामिना तुलसीदासेन कथितं रामचरितमानसे– "मोरे रामभरत दोऊ आंखी"।[12] पौराणिके– रूपकेऽस्मिन् चन्द्रस्यात्रेर्नेत्राभ्यां सह सम्बन्धः प्रदर्शितस्तत्रायमेव हेतुः यत्तदानीमत्रिगोत्रीया जना एवं चन्द्रविषयकं ज्ञानमधारयन्। कदा ग्रहणारम्भो भविष्यति कदा तस्यावसानं भविष्यति। कदा चन्द्रोदय-श्चन्द्रास्तश्च कदा भविष्यति इत्यादिविषयाणां गणनाम् अत्रिगोत्रीया जना एवं कुर्वन्ति स्म। अन्ये जना: विषयेऽस्मिन्ननभिज्ञा एवासन। ईदृशः संकेतः ऋग्वेदे दृश्यते।[13] स च ऋग्वेदीयमन्त्रस्याभिप्रायः पुराणे मनोरंजकं रूपकं विधाय कथारूपेणोपस्थापितो वर्तते।

**चन्द्रस्वरूपम्–**

**ये वै के चास्माल्लोकात् प्रयान्ति चन्द्रमसमेव ते सर्वे गच्छन्ति ।**

(कौषीतकि ब्राह्मणोपनिषत् 1.2 )

भूलोक इव चन्द्रलोकोऽपि वर्तते। तत्र पितृणां निवासो वर्तते, यथा उक्तकोषीतकीयोपनिषद्वाक्येन स्पष्टं भवति। परमनेन वाक्येन केवलमिदमेव प्रतीयते यच्चन्द्रोऽपि भूरिव घनीभूतेन पदार्थेन युक्तो वर्तते। पुराणेष्वपि चन्द्रमण्डलस्य स्पष्टोल्लेखो न दृश्यते। तत्रापि केवलं संकेतेनैव तस्य वर्णनं कृतम्, यथा–

**सूर्याचन्द्रमसोर्दिव्ये मण्डले भास्वरे खगे ।**
**जलतेजोमये शुक्ले वृत्तकुवभनिभे शुभे ।।**
**घनतोयात्मकं तत्र मण्डलं शशिन: स्मृतम् ।**
**घनतेजोमयं शुक्लं मण्डलं भास्करस्य तु ।।**

(ब्रह्माण्ड पुराण 2/24/78-79)

अत्र वृत्ताकारं घनतोयात्मकं च शशिनः मण्डलं वर्णितम्। अनेन तत्र निवासयोग्या भूमिरस्तीति सिध्यति। पुराणेऽपि स्थाने स्थाने देवानां ऋषीणां च चन्द्रलोकगमनस्य कथा दरीदृश्यते।[14] तस्योर्ध्वभागे तु पितृणां निवासः निर्दिष्टः। तत्र तेषां रात्रिदिनव्यवस्थाऽपि पूर्वनियोजिता वर्तते।[15] सारांशरूपेण इदमेव वक्तव्यमस्ति यद् वैदिककालादेव चन्द्रः एकेन स्वतन्त्रलोकरूपेण प्रसिद्धोऽस्ति। अस्य लोकस्य परिमाण विषये मत्स्यपुराणोक्तवचनमुपस्थाप्यते–

**अस्य भारतवर्षस्य विषकम्भात्तुल्यविस्तृतिम् ।**
**मण्डलं भास्करस्याथ योजनैस्तन्निबोधत ।।**
**विस्तारात्त्रिगुणश्चापि परिणाहोत्र मण्डले ।**
**विषकम्भान् मण्डलाच्चैव भास्कराद्द्विगुणः शशी ।।**

(मत्स्यपुराणे – 123/6-8)

एतदनुसारं भास्करस्य बिम्बव्यासः 9000 योजनात्मकोऽस्ति। अतोऽस्य त्रिगुणितं 27000 योजनात्मकं सूर्यस्य परिधिमण्डलम्। अस्माद्विषकम्भाद् व्यासाद् वा चन्द्रस्य मानं द्विगुणमस्ति। अर्थाच्चन्द्रस्य व्यासप्रमाणं 1800 योजनात्मकं परिधि-प्रमाणं च 54000 योजनात्मकमिति। परन्त्वेतानि प्रमाणानि अद्याऽऽधुनिकानुसन्धानेन प्राप्तपरिणामेन सह साम्यं न भजन्ते। एतदतिरिक्तं वेदेषु पुराणेषु च चन्द्रस्यापर-रूपमपि दृश्यते। यतश्चन्द्रः कुत्रचिद्देवत्वेन स्वीकृतः। अतोऽर्चनाङ्गभूतत्वेनास्य प्रतिमायाः कल्पनाऽपि वर्तते यथा–

**श्वेतः श्वेताम्बरधरः श्वेताश्वः श्वेतवाहनः ।**
**गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ।।** मत्स्यपुराणम्-(93/2)

ईदृशं मूर्तिनिर्माणं कर्तव्यम्। परन्तु सामान्यपूजाविधौ एतदतिरिक्तमपि स्वरूपं दृश्यते। यथा वासिष्ठीहवनपद्धतौ–

**"भास्करं वर्तुलं विद्याद् अर्धचन्द्रं निशाकरम्।"**

एवं स्थलभेदेन प्रसंगभेदेन च चन्द्रस्य पृथक्-पृथक् स्वरूपं दृश्यते। परन्तु कुत्रचिदपि चन्द्रपिण्डस्य विस्तृतं वर्णनं न प्राप्यते। तत्रस्थानां पदार्थानां विषये तु अस्माकं शास्त्रेऽत्यल्पमेव विवरणं प्राप्यते। यथा–

**अपां पुष्पमसि ताण्ड्यब्राह्मणम् (1/6/8)**

अत्र सोमसम्बन्धेन् चन्द्रस्य जलमयत्वं साधितम्। हे (सोम) त्वमपां जलस्य पुष्पमसि। सोमचन्द्रयोः परं घनिष्ठसम्बन्धत्वात् चन्द्रो जलमय इति स्पष्टम्। अमुमेवाऽऽशयं प्रगृह्य वायुपुराणेऽपि महर्षिव्यासेन लिखितम्–

**महादेवोऽमृतात्मासौ ह्यम्मयश्चन्द्रमाः स्मृतः। (1/27/48)**

कुत्रचित् शिवः आग्नेयपरमाणूनां मानवीयविग्रहरूपेण मन्यते। अतोऽयं शिवः यस्य हृदि अमृतो दिव्या आपो वा वर्तन्ते। जलमयं चन्द्रमसं सस्मार। अर्थाज्जल-संसर्गादस्य रचना जाता– उदकाश्चन्द्रमा स्मृतः (वायु.पु. 1/50/4) । अतोऽस्मिन् जलाधिक्यं स्वाभाविकम्। ईदृश एव विचारः ज्योतिषशास्त्रेऽपि मिलति। यथा भास्कराचार्येण सिद्धान्तशिरोमणौ लिखितम्– 'तरणि किरणसंगादेष पीयूषपिण्डः'[16] एवमेव कुत्रचिज्ज्लमयः पिण्ड इति निर्दिष्टम्।

चन्द्रेऽमृतत्वं वैदिककालादेव स्वीकृतमस्ति। अमृतत्वेनायमायुरारोग्यप्रदातेति प्रसिद्धम्।[17] सोमगायत्र्यां चन्द्रः कालरूपेण प्रदर्शितोऽस्ति। चन्द्रः शत्रुनाशकस्तेजसः शक्तेश्च प्रदाताऽप्यस्ति।

हरिवंशपुराणे चन्द्रस्य कानिचिन नामान्युल्लिखितानि सन्ति। यैस्तस्य गुणदोषस्वरूपापि प्रकटीभवन्ति। तानि नामानि श्लोकद्वयेन तत्र दर्शितानि विद्यन्ते–

**श्वेतभानुर्हिमतनुर्ज्योतिषामधिपः शशी ।**
**अब्दकृत् कालयोगात्मा इज्यो यज्ञरसोऽव्ययः ।।**
**ओषधीशः क्रियायोनिरम्भोनिधिरनुष्णभाक् ।**
**शीतांशुरमृताधारश्चपलः श्वेतवाहनः ।। (1/46/7-8)**

एतानि नामानि प्रायशश्चन्द्रस्य पिण्डत्वमेव समर्थयन्ति। परं नवग्रहस्तोत्रे यानि नामानि[18] सन्ति तानि केवलं चन्द्रे देवत्वमेवाङ्गीकृत्य उल्लिखितानि। उक्त श्लोके चन्द्रः 'अब्दकृत् कालयोगात्मा' इति शब्दाभ्यां सम्बोधितः। चन्द्रः कथमब्दकृत् इत्यस्य स्पष्टीकरणं ताण्ड्यब्राह्मणस्याऽधोऽङ्कितवचनाद् भवति–

**अग्निः संवत्सरः सूर्यः परिवत्सरः चन्द्रमा इदावत्सरः वायुः अनुवत्सरः।।**

(ताण्डयब्राह्मण 17/13/17)

अत्र संवत्सरेण सावनवर्षम्, परिवत्सरेण सौरवर्षम्, इदावत्सरेण चान्द्रवर्षं तथा चानुवत्सरेण नाक्षत्रवर्षमिति बोध्यम्। इदमेवाधारीकृत्य सूर्यसिद्धान्ते इयं कल्पना कृता वर्तते– **ब्राह्मं दिव्यं तथा पैत्र्यं प्राजापत्यं च गौरवम्।**

**सौरं च सावनं चान्द्रमार्क्षमानानि वै नव ।।** (सूर्यसिद्धान्तः 14/1)

एवमेव ओषधीशपदेनापि संबोधितोऽयमुक्तश्लोके। ग्रन्थान्तरे न केवलमोषधीननामीशश्चन्द्रः अपि त्वन्येषामप्यधीशो वर्तते। यथोक्तं हरिवंशपुराणे–

**द्विजानां वीरुधां चैव नक्षत्रग्रहयोस्तथा ।**
**यज्ञानां तपसां चैव सोमं राज्येऽभ्यसेचयत् ।। (1/4/2)**

ओषधीशस्य चन्द्रस्य स्पष्टाभिप्रायः पुराणेषु व्याख्यातो वर्तते। यच्चन्द्र एव स्वाद्वम्ललवणानां रसानामुत्पादकोऽस्ति[19]। चन्द्रस्योषध्या सह घनिष्ठः सम्बन्धो वर्तते। चन्द्राद्यः सोमः (तेजः) पतति पृथिव्यां तस्मादेवौषध्यः प्रादुर्भवन्ति। अस्योल्लेखः हरिवंशपुराणे दृश्यते–

**तस्य यच्च्यावितं तेजः पृथिवीमन्वपद्यत ।**
**ओषध्यस्ताः समुद्भूतास्तेजसा प्रज्ज्वलन्त्युत ।। (1/25/26)**

श्लोकोऽयं वायुपुराणे 90 अध्यायेऽपि वर्तते। चन्द्रः कथमोषधीशः इत्यस्मिन् विषये एका कथा हरिवंशपुराणे वर्तते।[20] एकदा प्रचेतसः क्रुद्ध भूत्वा

वृक्षानुन्मूलयि-तुमुद्यता:। तदा वृक्षराज: सोमस्तत्रागत्य प्रचेतस: प्रत्यवोचत्– इयं मारिषा नाम्नी वृक्षाणां दुहिता वर्तते। अनया सह परिणीता भूत्वा प्रसीदन्तु भवन्त:। प्रचेतसस्तया सह परिणयं चक्रु:। इयं कथा अत्यन्तमसाधारणी परमस्या गूढार्थोऽपि विद्यते, य: नीलकण्ठेनोक्तश्लोकस्य टीकायां प्रदर्शित:–

"वृक्षान् शोषयती वायुना तेषां सारांशो यथा स्वकरेण सौरतेजसि प्रक्षिप्तः। एवं कन्यारूपं वार्क्षं रेतः सोमस्य गर्भे धृतमिति युक्तम्।" अत्र नीलकण्ठेनैकं श्रुतिवाक्यमुद्धृतम्–

**"वृष्टिर्वै वृष्ट्वा चन्द्रमसमनुप्रविशति"**

श्रुतेरपि ओषधिसाररूपेण वृष्टेश्चन्द्रप्रवेशोऽवगम्यते। वर्णनेनानेन वृष्ट्योषधिचन्द्राणां परस्परमभिन्नः सम्बन्धो लक्षितः। चन्द्रसम्बन्धेन वर्षायाः वर्णनं वायुपुराणेऽपि दृश्यते, यथा–

**आदित्यपीतं सूर्याग्ने: सोमं संक्रमते जलम् ।**
**नाडीभिर्वायुयुक्ताभिर्लोकाधाने प्रवर्तते ।।**
**यत्सोमात्स्रवते सूर्यं तदभ्रेष्ववतिष्ठते ।**
**मेघां वायुनिघातेन विसृजन्ति जलं भुवि ।। (1/51/14-15)**

सूर्य: जलाशयाद् वनस्पतिभ्यः जीवानां शरीराच्च जलांशं परिशोष्य चन्द्रस्य पोषणं करोति। चन्द्रस्तान् जलकणान् वायुनाडीभिः मेघान् प्रतियच्छति। मेघास्तान् जलकणान् स्वोदरीकृत्य यथाकालं वर्षन्ति। विवरणमिदं विष्णुपुराणेऽपि अष्ट-माध्यायस्य 12 श्लोकादारभ्य 16 श्लोकं यावन्निरूपितं वर्तते।

ज्योतिषशास्त्रे चन्द्रस्य जीवमात्रेण सहात्यन्तो घनिष्ठसम्बन्धः प्रदर्शितः। यथा रात्रौ चन्द्रोदयसम्बन्धेन कुमुदनीकुलं प्रस्फुटितं भवति जलजाश्च मुकुलिताः भवन्ति। तथैव चन्द्रस्यानुकूलत्वे जातकस्य प्रकर्षः प्रतिकूलत्वे चापकर्षो भवति।

चन्द्रे जीवनधारणस्य विनाशस्य च शक्तिर्विद्यते। ज्योतिषशास्त्रे चन्द्रस्यान्येषां ग्रहाणां च प्रकृतेरध्ययनं समुचितं विधाय तत्तद्ग्रहेण सम्बद्धानामवयवानां पृथक् पृथगुल्लेखः कृतः, यथा चन्द्रेण सम्बद्धा अवयवा निम्नांकिताः सन्ति। प्रमुखतया चन्द्रस्याङ्गं मनो वर्तते। परमस्मादतिरिक्ता अन्येऽप्यवयवा: सन्ति यथा–

**स्वच्छ: प्राज्ञो गौरश्चपल: कफवातिको रुधिरसारश्च ।**
**मृदुवाग्घृणी प्रियसखस्तनुवृत्तश्चन्द्रमा प्रांशु: ।।**

(लघुजातकम्, अध्याय: 4, श्लोक: 2)

श्लोकेनानेन चन्द्रस्य स्वरूपं तस्य गुणधर्मौ च परिज्ञातौ। परं स्वरूपवर्णन-व्याजेनानेन सम्बद्धा अवयवाः निर्दिष्टा आचार्यैः।

चन्द्रस्वरूपस्थित्यनुसारेणैतेऽवयवाः विशेषेण प्रभाविताः भवन्ति। यदि चन्द्रः शुभः पुष्टिकरः स्यात्तदा एतेऽवयवाः वृद्धिं गताः भवेयुः। अन्यथा प्रथममेतेषु अवयवेष्वेव विकारो भविष्यति। ग्रहाणां प्रकृतेः स्थितेश्च ज्ञानेन जातकस्य सौख्यानिष्टयोर्ज्ञानं सम्यक्तया कर्तुं शक्यते।

## सन्दर्भग्रन्थः-


1. चन्द्रगोलविमर्शः- प्रोफेसर रामचन्द्रपाण्डेयः, भूमिका
2. वाल्मीकीरामायणम्-10/82
3. ऋग्वेदसंहिता-10/190/1-3
4. ऋग्वेदः– 10/90/13
5. तस्माज्ज्योतिष्ठिते देवात् सर्वभूतगतं मनः। चन्द्र मा येन संयुक्त : प्राकशगुणधारणः। (महाभारत 12/354/11)
6. जैमिनीयब्राह्मणम्-2/2/2
7. शतपथब्राह्मणम्-1/6/3/17
8. शतपथब्राह्मणम्-6/1/2/4
9. भागवतमहापुराणम्- 8/7/1-9/29
10. स्कन्द-पुराणे लिखितं वर्तते यच्चन्द्रमा सर्वप्रथमं रत्नटमासीत्।
    यथा– मध्यः माने महाब्धौप तु निर्गतश्चान्द्रा अग्रतः।
11. पीयूषपूर्णः सर्वेषां देवानां कार्यसिद्धये।। स्कवन्दत-1/11/26
12. वायपुराणम्-2/28/5-18
13. रामचरितमानस-2/30/6
14. ऋग्वेदः-5/40/5-9
15. भविष्यत्पुराणम्-3/2/23
16. पित्र्ये रात्रयहनी मासः प्रविभागस्तुच पक्षयोः।
    कर्मचेष्टा स्वहः कृष्णः शुक्लः स्वप्नायि शर्वरी।। मनुस्मृति-1/66
17. सिद्धान्तशिरोमणि-गोलाध्यायः श्रृंगोन्नकति अध्यायः- श्लोकः-1
18. भागं देवेभ्यो विदधात्यायन् प्र चन्द्र मास्तिरते दीर्घमायुः। ऋग्वेदः 10/85/19
19. सुधाकरश्च सोमश्च ग्लौयरजः कुमुदप्रियः। लोकप्रियः शुभ्रभानुश्चन्द्र रोहिणीपतिः।।
20. शशी हिमकरो राजा द्विजराजो निशाकरः। आत्रेय इन्दुः शीतांशुरोषधीशः कलानिधिः... (नवग्रहस्तोत्रे चन्द्रास्तोतत्रम्।)

21. रसाः स्वरद्वम्ल्येयवणाः सोमजाः परिकीर्तिताः- (अग्नि पुराण 281/2)

22. इयं कथा विस्तरेण परिशिष्टे प्रदत्ता विष्णुतपुराणमाधारीकृत्य।

*सहायकाचार्यः,*
*ज्योतिषविभागः,*
*उत्तराखण्डमुक्तविश्वविद्यालयः,*
*हल्द्वानी ।*